# श्रीमद्भगवद्गीता - द्वितीयोऽध्यायः

## साङ्ख्य योगः

**सञ्जय उवाच**

तं तथा कृपयाऽऽविष्टम् अश्रुपूर्णा कुलेक्षणम् ।
विषीदन्त मिदं वाक्यम् उवाच मधुसूदनः ॥1॥

**श्री भगवानुवाच**

कुतस्त्वा कश्मल मिदं विषमे समुपस्थितम् ।
अनार्यजुष्ट मस्वर्ग्यम् अकीर्तिकर मर्जुन ॥2॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युप पद्यते ।
क्षुद्रं हृदय दौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥3॥

**अर्जुन उवाच**

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥4॥

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्य मपीह लोके ।
हत्वार्थ कामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिर प्रदिग्धान् ॥5॥

न चैतद्विद्मः कतरन्नो गरीयः यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥6॥

कार्पण्यदोषो पहत स्वभावः पृच्छामि त्वां धर्म सम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥7॥

न हि प्रपश्यामि ममापनुद्यात् यच्छोक मुच्छोषण मिन्द्रियाणाम् ।
अवाप्य भूमा वसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥8॥

**सञ्जय उवाच**

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह ॥9॥

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयो र्मध्ये विषीदन्त मिदं वचः ॥10॥

**श्री भगवानुवाच**

अशोच्या नन्वशोचस्त्वं प्रज्ञा वादांश्च भाषसे ।
गतासून गतासूंश्च नानुशोचन्ति पण्डिताः ॥11॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥12॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तर प्राप्तिः धीरस्तत्र न मुह्यति ॥13॥

मात्रा स्पर्शास्तु कौन्तेय शीतोष्ण सुख दुःखदाः ।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत ॥14॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
सम दुःख सुखं धीरं सोऽमृतत्वाय कल्पते ॥15॥

नासतो विद्यते भावः नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तः त्वनयोस्तत्त्व दर्शिभिः ॥16॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाश मव्यय स्यास्य न कश्चित्कर्तु मर्हति ॥17॥

अन्तवन्त इमे देहाः नित्य स्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥18॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतः नायं हन्ति न हन्यते ॥19॥

न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणः न हन्यते हन्यमाने शरीरे ॥20॥

वेदा विनाशिनं नित्यं य एन मज मव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥21॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही ॥22॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापः न शोषयति मारुतः ॥23॥

अच्छेद्योऽय मदाह्योऽयम् अक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुः अचलोऽयं सनातनः ॥24॥

अव्यक्तोऽय मचिन्त्योऽयम् अविकार्योऽय मुच्यते ।
तस्मा देवं विदित्वैनं नानुशोचितु मर्हसि ॥25॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथाऽपि त्वं महाबाहो नैवं शोचितु मर्हसि ॥26॥

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मा दपरिहार्येऽर्थे न त्वं शोचितु मर्हसि ॥27॥

अव्यक्तादीनि भूतानि व्यक्त मध्यानि भारत ।
अव्यक्त निधनान्येव तत्र का परिदेवना ॥28॥

आश्चर्यवत् पश्यति कश्चिदेनं आश्चर्यवद् वदति तथैव चान्यः ।
आश्चर्यवच्चैन मन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥29॥

देही नित्य मवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितु मर्हसि ॥30॥

स्वधर्म मपि चावेक्ष्य न विकम्पितु मर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥31॥

यदृच्छया चोपपन्नं स्वर्गद्वार मपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्ध मीदृशम् ॥32॥

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पाप मवाप्स्यसि ॥33॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिः मरणा दतिरिच्यते ॥34॥

भयाद्रणा दुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतः भूत्वा यास्यसि लाघवम् ॥35॥

अवाच्य वादांश्च बहून् वदिष्यन्ति तवाहिताः ।
निन्दन्त स्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥36॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥37॥

सुख दुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पाप मवाप्स्यसि ॥38॥

एषा तेऽभिहिता साङ्ख्ये बुद्धि र्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥39॥

नेहाभिक्रम नाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्प मप्यस्य धर्मस्य त्रायते महतो भयात् ॥40॥

व्यवसा यात्मिका बुद्धिः एकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥41॥

यामिमां पुष्पितां वाचं प्रवदन्त्य विपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥42॥

कामात्मानः स्वर्गपराः जन्मकर्म फलप्रदाम् ।
क्रिया विशेष बहुलां भोगैश्वर्य गतिं प्रति ॥43॥

भोगैश्वर्य प्रसक्तानां तयाऽपहृत चेतसाम् ।
व्यवसा यात्मिका बुद्धिः समाधौ न विधीयते ॥44॥

त्रैगुण्य विषया वेदाः निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्य सत्त्वस्थः निर्योगक्षेम आत्मवान् ॥45॥

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥46॥

कर्मण्ये वाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफल हेतुर्भूः मा ते सङ्गोऽस्त्व कर्मणि ॥47॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥48॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरण मन्विच्छ कृपणाः फलहेतवः ॥49॥

बुद्धियुक्तो जहातीह उभे सुकृत दुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥50॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्ध विनिर्मुक्ताः पदं गच्छन्त्य नामयम् ॥51॥

यदा ते मोहकलिलं बुद्धिर्व्यति तरिष्यति ।
तदा गन्ताऽसि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥52॥

श्रुतिवि प्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधा वचला बुद्धिः तदा योग मवाप्स्यसि ॥53॥

**अर्जुन उवाच**

स्थित प्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥54॥

**श्री भगवानुवाच**

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।
आत्मन्ये वात्मना तुष्टः स्थित प्रज्ञस्तदोच्यते ॥55॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगत स्पृहः ।
वीतराग भयक्रोधः स्थितधी र्मुनि रुच्यते ॥56॥

यः सर्वत्रा नभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥57॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रिया णीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥58॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥59॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥60॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥61॥

ध्यायतो विषयान्पुंसः सङ्गस्ते षूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥62॥

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृति विभ्रमः ।
स्मृति भ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥63॥

रागद्वेष वियुक्तैस्तु विषया निन्द्रियैश्चरन् ।
आत्मवश्यै र्विधेयात्मा प्रसाद मधिगच्छति ॥64॥

प्रसादे सर्व दुःखानां हानि रस्योपजायते ।
प्रसन्न चेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥65॥

नाऽस्ति बुद्धि रयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिः अशान्तस्य कुतः सुखम् ॥66॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नाव मिवाम्भसि ॥67॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रिया णीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥68॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥69॥

आपूर्यमाणं अचल प्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्ति माप्नोति न कामकामी ॥70॥

विहाय कामान्यः सर्वान् पुमांश्चरति निस्स्पृहः ।
निर्ममो निरहङ्कारः स शान्ति मधिगच्छति ॥71॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्या मन्तकालेऽपि ब्रह्म निर्वाण मृच्छति ॥72॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुन संवादे साङ्ख्य योगो नाम द्वितीयोऽध्यायः ॥